CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जुलाई २००३ ईसवीयाब्दः ओ३म् R.N.I. Regd No. UPBIL/1998/1485

ज्वालापुरीय - गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

वञ्चकोऽपि न पापिष्ठः

—डा० प्रशस्यमित्रशास्त्री
बी–२६, आनन्दनगरम्, रायबरेली (उ०प्र०)

कश्चित् क्रैस्तगुरुः स्वीये 'चर्च'-भवने तिष्ठन् विचारनिरतः आसीत् । तन्मध्ये एव कश्चन पुरुषः तत् भवनं प्रविष्टवान् । सः नगरस्य प्रसिद्धः धूर्तः वञ्चकः आसीत् । सः गुरुम् उक्तवान्- 'अहं किमपि महत् पापं कृतवान् । कृपया भवान् तस्य प्रायश्चित्तं कथयतु । अहम् एतस्मात् पापभारात् मुक्तिं प्राप्तुं कामये ।' 'कथङ्कारं पापं संवृत्तम् ?' गुरुः अपृच्छत् । 'अहं क्वचित् गच्छामि स्म, तत्र पथि एका रज्जुः मम दृष्टिपथं समागता । तामेव नीत्वा अहं स्वगृहम् आगतवान्' । वञ्चकः प्रोक्तवान् ।

'एतत् तु किमपि पापकृत्यं न वर्तते । किं त्वम् एतत्कारणादेव समुद्विग्नः वर्तसे ?।' गुरुः पृष्टवान् । 'न हि महोदय ! एतन्न वर्तते । वस्तुतः तस्याः रज्जोः द्वितीयशिरोभागः एकस्याः गोः स्कन्धे प्रतिबद्धः आसीत् । यदा अहं रज्जुम् उत्थाप्य गृहम् आगतवान् तदा सा रज्जुबद्धा गौः अपि माम् अनुवर्तमाना गृहं समागता ।' सः वञ्चकः समुद्विग्नमानसः प्रोक्तवान् ।

'एवं तर्हि त्वं तां गां तस्याः स्वामिने प्रत्यर्पय, त्वदीयं पापमपि समाप्तं भविष्यति ।' गुरुः स्वकीयं निर्णयं श्रावयन् अब्रवीत् । 'परन्तु सा गौः मत्पार्श्वे क्व वर्तते ? सा तु मया विक्रीता ।' वञ्चकः रुदन् एव प्रोवाच । 'अस्तु तर्हि, त्वं तानि रूप्यकाणि एव गोस्वामिने प्रत्यर्पय ।' गुरुः तं मन्त्रयन् इव प्राह । 'परन्तु महोदय ! साम्प्रतं तु तानि रूप्यकाणि अपि मत्पार्श्वे न वर्तन्ते । तानि तु पूर्वमेव व्ययितानि ।' इति कथयन् सः वञ्चकः शनैः शनैः गुरोः अतिनिकटं समागतः । :

गुरुस्तु तस्य वचनं निशम्य चिन्तारतः सञ्जातः । तं चिन्तनपरं विचारमग्नं च विलोक्य सः वञ्चकः गुरोः युतकात् धनस्यूतं (पर्स्) शनैः निस्सारयामास । गुरुः तदानीं तस्य तं व्यापारं व्यवहारं च ज्ञातुम् असमर्थः आसीत् । पुनः वञ्चकः प्राह 'गुरुवर्य! अपरं किञ्चित् प्रष्टव्यं वर्तते ।' 'एवम्, निस्सन्दिग्धं पृच्छ । किं प्रष्टम् इच्छसि ?' 'यदि कस्यचित् पुरुषस्य धनं मत्पार्श्वे भवेत् तदा मया किं कर्तव्यम् ?'

[शेषांशः २० पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दूरभाष- ०१३३४ { २५४२९५ / २२५३७७ (ज्वालापुरम्)   तारगृहम् – महाविद्यालयः (ज्वालापुरम्)

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम् – ९४   अङ्कः - १

सम्पादकः
डॉ० हरिगोपालशास्त्री
व्याकरणाचार्यः
एम्०ए०, पीएच्० डी०
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डा० केशवप्रसाद उपाध्याय
साहित्याचार्यः
एम्० ए०, पीएच्० डी०

प्रबन्ध-सम्पादकः
डा० अजयकौशिकः
साहित्याचार्यः
एम० ए०, पीएच्० डी०

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्- २४९४०५
(उत्तराञ्चल-प्रदेशः)

शुल्क-विवरणम्

प्रत्यङ्कम्	—	५/-
वार्षिकम्	—	५०/-
आजीवनम्	—	५००/-

विषयानुक्रमणिका

१-श्रुतिसुधा — महर्षिदयानन्दसरस्वती ३
२-महामहोपाध्यायः आचार्यः श्रीगङ्गेशोपाध्यायः — डा० उदयनाथझा 'अशोकः' ४
३-शुभाऽऽर्यसंस्कृतिः — डॉ० केशवरामः शर्मा ६
४-घटोत्कच-वनम् — डॉ० कीर्तिवल्लभः शक्टा ७
५-अन्याय्यमीराकयुद्धम् — प्रो० हरिश्चन्द्रः रेणापुरकरः ११
६-ईशस्तवः — डॉ० बलवीरदत्तशास्त्री १३
७-जलप्रदूषणं निरोधोपायाश्च — डॉ० निरञ्जनमिश्रः १४
८-नूनं तदेव सूते !! — मिश्रोऽभिराजराजेन्द्रः १६
९-कविता-युगलम् — डॉ० निरञ्जनमिश्रः १७
१०-महाविद्यालय-समाचाराः — डॉ० व्रजेन्द्रकुमारसिंहदेवः १७
११-वञ्चकोऽपि पापिष्ठः — डॉ० प्रशस्यमित्र शास्त्री २०

दयानन्दः स्वामी नयनपथगामी भवतु मे

—डॉ० व्रजेन्द्रकुमारसिंहदेवः साहित्य—प्राध्यापकः
गुरुकुलमहाविद्यालयः ज्वालापुरम् (हरिद्वारम्)

(१)

प्रसिद्धः शास्त्राणां प्रगुणकतया पण्डितचये
तपस्तेजोमूर्त्तिः सुमतिरपि वैदुष्य— निकषः ।
समुद्धारं कृत्वा जगति वर—वेदोपनिषदां
दयानन्दः स्वामी नयनपथगामी भवतु मे ॥

(२)

स एकोऽनेकेषां निखिल—दुरितं दूरमकरोत्
दशां दुष्टां दृष्ट्वा जगति नवदृष्टिं व्यरचयत् ।
समाजे धर्मस्य प्रगति—जनको यः सुविदितो
दयानन्दः स्वामी नयनपथगामी भवतु मे ॥

(३)

स राष्ट्राभ्युत्थाने जयति सततं दिव्य-पुरुषः
स्वदेशस्वातन्त्र्ये प्रबलतर— यत्नं समकरोत् ।
जनानामेकत्वे सफलमभिधत्ते सुरगिरं
दयानन्दः स्वामी नयनपथगामी भवतु मे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

※ ओ३म् ※

ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

मविक-भरित-भारतोदयोऽयं भव-विभवोद्भवभावनाभिलाषी ।
भगवति भुवि भक्ति-भावभाजां भव-भय-भाव-भरं भ्रियान्नभूमन् ॥

× × ×

निशम्यतां लेख–ललाम–सञ्चय—प्रकाशने येन कृतोऽतिनिश्चयः ।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः' ॥

वर्षम् – ९४	आषाढ २०६० विक्रमाब्दः, जुलाई २००३ ईसवीयाब्दः	अङ्कः – १

श्रुति-सुधा

ओ३म् इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥

—ऋग्वेद १/१०/१

पदार्थः —

(इयम्) प्रत्यक्षं कार्यनिष्ठम् । (स्तोमम्) गुणकीर्त्तनम् । (अर्हते) योग्याय । (जातवेदसे) यो विद्वान् जातं सर्वं वेत्ति तस्मै, जातेषु कार्येषु विद्यमानाय वा । (रथमिव) यथा रमण—साधनं विमानादियानं तथा । (सम्) (महेम) सत्कुर्याम । अत्र 'अन्येषामपि दृश्यते (अ० ६/३/१३६)' इति दीर्घः । (मनीषया) विद्याक्रियासुशिक्षाजातया प्रज्ञया । (भद्रा) कल्याणकारिणी । (हि) खलु । (नः) अस्माकम् । (प्रमतिः) प्रकृष्टा बुद्धिः । (अस्य) सभाध्यक्षस्य । (संसदि) संसीदन्ति विद्वांसो यस्यां तस्याम् । (अग्ने) विद्यादिगुणैर्विख्यात । (सख्ये) सख्युर्भावे कर्मणि वा । (मा) निषेधे । (रिषाम) हिंसिता भवेम । अत्र 'अन्येषामपि दृश्यते (अ० ६/३/१३६)' इति दीर्घः । (वयम्) तव) ॥ १॥ अत्रोपमावाचकलुप्तोमालङ्कारौ ।

भावार्थः —

मनुष्याः यथा शिल्पविद्यासिद्धानि विमानादीनि संसाध्य मित्रान् सत्कुर्युः । यदा यदा सभासदः सभायामासीरन् तदा तदा हठादुराग्रहं त्यक्त्वा सर्वेषां कल्याणकरं कार्य्यं न त्यजेयुः । यद्यदग्न्यादिपदार्थेषु विज्ञानं स्यात्, तत्सर्वैः सह मित्रभावमाश्रित्य सर्वेभ्यो निवेदयेयुः । नैतेन विना मनुष्याणां हितं सम्भवति ॥ १ ॥

—महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, तृतीयो भागः, ४५९ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदवाक्यप्रमाणपारावारपारीणः

महामहोपाध्यायः आचार्यश्रीगङ्गेशोपाध्यायः

—डॉ० उदयनाथझा 'अशोकः'
राष्ट्रिय-संस्कृत-संस्थानम् (मानित—विश्वविद्यालयः)
श्रीसदाशिवपरिसरः, पुरी-७५२००१ (उत्कलप्रदेशः)

इह खलु विद्वत्तल्लजानां गुणानुवर्णनप्रसङ्गे 'पदवाक्यप्रमाणपारावापारीणे' त्यादिविशिष्टा संस्तुतिः प्रयुज्यमाना शोश्रूयते। तत्र 'पदं' नाम सर्वविद्यामूलभूतं पाणिनि—महर्षिणा प्रणीतं व्याकरणशास्त्रं प्रसिद्धमेव, पदशास्त्रन्नाम व्याक—रणमिति। 'प्रमाणं' नाम सुप्रसिद्धं तर्कशास्त्रम्, तत्सर्वशास्त्रोपकारकमिति सर्वैरिष्यते। तदध्ययनेन विना न कोऽपि पण्डितोऽधरं स्पन्दयितुमपि शक्नोति। तच्च कणाद—महर्षिणा प्रणीतं वैशेषिकशास्त्रम्, गौतममहर्षिणा च रचितं न्यायशास्त्रमिति द्विविधं चकास्ति। तत्र द्रव्यादिसप्तपदार्थान् प्रत्यक्षानुमानाख्यं प्रमाणद्वयं च गृहीत्वा वैशेषिकं प्रववृते। परन्तु न्यायशास्त्रमिदं प्रमाणप्रमेयादीन् षोडशपदार्थान् प्रत्यक्षानुमानोपमानोपमानशब्दाख्यानि चत्वारि स्वतन्त्रप्रमाणानि च स्वीकृत्य प्रवृत्तम्। एवं पदशास्त्रं प्रमाणशास्त्रं च लोके व्याप्तिमवाप्य प्रकाशेते।

तयोर्मध्ये मध्यमणिन्यायेन संग्रथितं 'वाक्यं' शास्त्रम्, तदेव मीमांसाशास्त्रमित्युच्यते। तच्च पूर्वोत्तरभावेन द्वैराश्येन विभक्तम्। सागरप्रख्येऽस्मिन्नेव आयतन्ते तरङ्गभेदा इव सर्वे वाक्यार्थनिर्णयानुकूला न्यायविशेषाः। नहि पदतत्त्वज्ञानेन प्रमाणतत्त्वपरीक्षया वा विनावाक्यन्यायसूक्ष्मज्ञानं वाक्यार्थो यथावज्ज्ञातुं पार्यते। वेदस्य निकृष्टवाक्यार्थ—निर्णयव्याजेनाऽशेषपुरुषार्थरत्नाकरस्य भगवतो धर्मस्य वास्तविकं तत्त्वमवगमयितुं प्रवृत्तमिदं जैमिनीयं शास्त्रम्। धर्मशास्त्रमित्यप्यस्य व्यवहारः दृश्यतेतराम्।

एतेषु त्रिषु शास्त्रेषु कृतभूरिपरिश्रमा—दशेषविषयविशेषज्ञमर्मज्ञत्वाद् वास्तविकरूपेण एव आसन् पदवाक्यप्रमाणपारावारपारीणाः आचार्यवर्य्याः श्रीमन्तो गङ्गेशोपाध्यायाः। प्रमाणे हि एव नव्यन्यायशास्त्रमपि राराजते। तत्र द्वादशशताब्द्यां मिथिलायां करमहाछादन-वंशीयाः वत्सगोत्रीयाः श्रीमन्तो गङ्गेशोपाध्यायाः कणादात् पदार्थसप्तकं गोतमीयात् प्रमाणचतुष्टयं च गृहीत्वा प्रत्यक्षानुमानोपमानशब्दाख्य—खण्डचतुष्टयविभागपूर्वकं 'तत्त्वचिन्तामणि' इति यथार्थनामकं ग्रन्थराजं प्रणिनिन्युः। एष एव ग्रन्थो नव्यन्याय-शास्त्रस्य प्रथमो मूलस्तम्भः। तत्र च प्रमाणानां प्रामाण्यं च प्रत्यपीपदत्।

गङ्गेशोपाध्यायात् पितुरेवाधिगतन्यायविद्याः वर्धमानोपाध्यायप्रसिद्धाः वराहेश्वरोपाध्यायाः तत्त्वचिन्तामणिप्रकाश—नामकं व्याख्यानं विरचयामासुः। अनन्तरं त्रयोदशशतकान्त्यभागे महादेवसूनुः पितृव्याद्धरिमिश्रादधिगततर्कतत्त्वः पक्षधरापराख्याख्यातः जयदेवमिश्रः मण्यालोक—नाम्नीं टीकां व्यातेने। अस्यान्तेवासिनः वासुदेव-मिश्ररुचिदत्तोपाध्याय— भगीरथठक्कुर-प्रभृतयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहवो हि मैथिलाः अन्तर्वाणिकुलललामभूताः प्रबन्धप्रणेतार आसन् । तत्र पक्षधरभ्रातुष्पुत्रः वासुदेवः न्यायसिद्धान्तसाराभिधां चिन्तामणि-व्याख्यां निर्ममे, रुचिदत्तोऽपि चिन्तामणिप्रकाश नाम्नीं टीकां रचयामास । शङ्करमिश्रः द्वितीयवाचस्पतिमिश्रः भगीरथठक्कुरः महेश—ठक्कुरः मधुसूदनठक्कुरः यज्ञपत्युपाध्यायप्रभृतयः अस्यां चिन्तामणो स्वकीयां टीकां निर्ममिरे। नवद्वीपवास्तव्यः वासुदेवसार्वभौमोऽपि काममपि चिन्तामणिव्याख्यां चकारेति वदन्ति । यस्यान्ते-वासिभिः रघुनाथशिरोमणिभिः दीधितिनामा व्याख्या व्यरचि । दीधितिग्रन्थस्य मथुरानाथेन जगदीशतर्कालङ्कारैः गदाधरभट्टाचार्यैश्च प्रत्येकं व्याख्यानानि विरचितानि । तेषामुपरि विद्वद्वी-रैर्व्याख्यानानि क्रोडपत्राणि च व्यरचिषत । नव्यन्यायानुसारेण एव तर्कसङ्ग्रह-न्यायबोधिनी-दीपिका-नीलकण्ठप्रकाश-मुक्तावली-दिनकरी-रामरुद्री-प्रभृतयः प्रकरणग्रन्थाः प्रववृतिरे ।

'तत्त्वचिन्तामणि'—नामकं यत्सकलदार्श-निकैराद्रियमाणं महान्तं प्रबन्धं गङ्गेशोपाध्यायाः निरमासिषुः, तत्र खण्डचतुष्टयेषु शब्दानुमान-खण्डौ सुविस्तृतौ उभाभ्यासीषन्न्यूनः प्रत्यक्षखण्डः तस्मादपि सङ्कुचितोपमानखण्डश्च । शब्दानुमान खण्डयोः शब्दखण्डे शाब्दबोधोपयोगिन आकाङ्-क्षादयः प्रवर्तकज्ञानविषयो लिङ्गाद्यर्थः, पदपदा-र्थयोः सम्बन्धः, सामान्यतो धात्वर्थः, उपसर्गाणां द्योतकता, समासे एकार्थीभावनिराकरणाय तत्तत्पदार्थान्वयनिरूपणपूर्वकं समासजन्यशाब्द-बोधः, तदुपयोगिनो व्युत्पत्तिविशेषाश्च विचार-पूर्वकं निरूपिताः । ग्रन्थस्यास्य पठितारः पाठयितारश्च दुर्लभा एव स्युः, अस्य चिन्तामणे-रतिगम्भीरत्वाद् विषयस्य दुर्धरत्वाच्च ।

उदयनाचार्यसमयं यावत् शाक्यपण्डिताः प्रतिपक्षाः न्यायदर्शनदूषका आसन् । ततः परमुपरते शाक्यदिगम्बरादिकोलाहले वैदिक-दर्शनानुयायिनां दूषणप्रकारा एव समालोचयितव्या अभूवन् । तत्त्वचिन्तामणिग्रन्थे नैदम्पर्येण शाक्यसमयः निराकारि । परन्तु प्राभाकरमीमांसक—मत—निरासे महानादरो लक्ष्यते गङ्गेशोपा—ध्यायानाम् । यतो हि ग्रन्थोपक्रमे तरुक्तम्—

'अन्वीक्षानयमाकलय्य गुरुभिर्ज्ञात्वा गुरूणां मतं
चिन्तादिव्यविलोचनेन च तयोः सारं विलोक्याखिलम् ।
तन्त्रे दोष—गणेन दुर्गमतरे सिद्धान्तदीक्षागुरु—
गङ्गेशस्तनुते मितेन वचसा श्रीतत्त्वचिन्तामणिम् ।।

आचार्य गङ्गेशोपाध्यायेषु प्रतिभावलेषु मीमांसायामपि अनितरसाधारणं वैदुष्यमासीदिति एतत्तनयानां श्रीमतां वर्द्धमानोपाध्यायानां ग्रन्थादवगम्यते—

'न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ।।'

अपि च—

'यस्तर्कतन्त्रशतपत्रसहस्ररश्मि—
गङ्गेश्वरः सुकविकैरवकाननेन्दुः ।
तस्यात्मजोऽतिविषमं कुसुमाञ्जलिं ते
प्राकाशयत् कृतिमुदे बुधवर्द्धमानः ।।

नैतावदेव, अपि तु एतच्च तत्त्वचिन्तामणावपि सम्यक् प्रतिफलति । मङ्गलवादादिषु प्रमाण-चतुष्टयवादावसानेषु वादेषु, प्रायः गुरूणां मतस्य तदीयावान्तरमतप्रभेदनिग्रहप्रमाणपूर्वकं निरसनेन 'न्यायशास्त्रं गुरुमतं च ज्ञात्वा तयोः सारांशं निर्णीय न्याय-सिद्धान्तं निरूपयामि' इति प्रतिज्ञातं निर्व्यूढमुपलभ्यते ।

आचार्यगङ्गेशोपाध्यायस्य मूलनाम 'गङ्गेश्वरोपाध्यायः' आसीदिति तदीयात्मजस्य वर्धमानस्य बहुषु स्थलेषु निर्देशतोऽवगच्छामः । यथा—

'गङ्गेश्वराय गुरवे पित्रेऽत्र भवते नमः' ।

अन्यत्राप्यवलोकनीयं यथा—

गङ्गेश्वरः सुकविकैरवकाननेन्दुः'

इत्यादिनापि एतदेव परिज्ञायते ।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुभाऽऽर्यसंस्कृतिः

—आचार्य डॉ० केशवरामः शर्मा
बी-५६, सड़क ३, उत्तरी छज्जूपुरम्
शाहदरा, दिल्ली —११००६४

(१)

त्राणाय सर्वस्य परोपकाराय ★
लोकस्य मङ्गलहितसाधनाय।
शरण्या अरातेरपि स्युर्वीरा
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(२)

यस्यां कपोतः स्वशरीरमांसेन
'शिवि'-नृपेण खलु रक्षित आसीत्।
शरणागतस्य कथं रक्षणं स्यात्
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(३)

निजास्थिदानेन कृतदेवकार्यं
सुरेन्द्रः स्वयं याचकविप्रवेशः।
'ऋषेर्दधीचेः' खलु दानकीर्तेः
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(४)

आचार्यदेवो नु पितृमातृभवतः
'श्रवणस्य' तुल्योऽपि कुत्रास्ति लोके ?।
पित्रोः शुश्रूषाकर्तव्य-निष्ठयोः
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(५)

जनकस्य वचनं मानः कुलस्य
राज्यस्य त्यागेन 'रामेण' रक्षितौ।
पतिव्रतं श्रुवितं भूमिजाया
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(६)

पुत्रस्य देहो भार्यासाहाय्येन
हरये प्रदत्तः स्वयमेव छिन्नः।
'मयूरध्वजस्य' विशिष्टदानस्य
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(७)

त्यक्त्वा स्वधर्मं नु यवनो भवेच्चेत्
'हकीकतो' लब्धवैभवमुखी स्यात्।
निधनं स्वधर्मे त्वङ्गीकृतं तेन
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(८)

प्राणा अपि दत्ता देशस्य हेतोः
'सुभाष' 'शेखर, 'भगता' दिवीरैः।
जनन्याः प्रथमाऽस्ति स्वजन्मभूमिः
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(९)

यस्यामहिंसाऽस्त्र-शुभप्रयोगेन
विफलान्यस्त्राणि कुशासकानाम्।
'गान्धि'—महात्मनो दृढता विचित्रा
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

(१०)

अद्यापि विश्वस्य खलु मङ्गलाय
दीनस्य हीनस्य सुखाय लाभाय।
बन्धुत्वभावमखिलस्य विश्वस्य
उद्घोषिताऽस्ति हि शुभाऽऽर्यसंस्कृतिः॥

★ अत्र अष्टादश मात्रात्मकः स्वरचितछन्दः वर्तते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घटोत्कच—वनम्

—डॉ० कीर्तिवल्लभः शक्टा, शारदा ज्योतिर्भवनम्
एम० ई० एस० कैम्प समक्षम् चम्पावतम् (उत्तराञ्चलम्)

अथ प्रथमोऽङ्क

[१]

यस्या भाति बिभूतिदा भगवती याम्ये मुदा हिंगला,
वामे मानस[1]-मन्दिरं जल[2]-युतं पूर्वे सुक्रान्तीश्वरः।
मध्ये गोरल[3]-भैरवौ च वसतः श्रीनागबालीश्वरौ
वन्दे तां नगरीं सदा शिवमयीं चम्पावतीं सर्वदा ॥

अपि च—

[२]

या भीमा दिव्यरुपा निवसति भवने पर्वते कूर्मपृष्ठे
वन्द्या या विश्वधात्री सकलजनगणैरर्चिताऽऽराधिता च
लोकेभ्यः सिद्धिदात्री विशद गुणयुता यास्ति सौम्या विशाला
सा देवी नः प्रसन्ना दिशतु ननु सदा विश्वकल्याण दृष्टिम् ॥

प्रस्तावना

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधारः —

अलमति विस्तरेण (नेपथ्याभिमुखमवलोक्य) आर्ये! कूर्माचले सम्प्राप्ता वयमिदानीम्। पश्य, चम्पावतीं परितः उत्तुङ्गानां हरित-ललित-वर्णानां विविधभूधराणां मनोहारिणो वलयाकृतिः पङ्क्तिः वस्तुत अलौकिकीं शोभां धारयति।

नटी —

नन्वार्यपुत्र! सुरम्यं रूपमवलोकयतु। अत्र मोदते मे चेतः।

सूत्रधारः —

खल्वत्र विविध-स्वरूपास्सिद्धाः गन्धर्वाः ऋषयः देवताः मनुष्याः किन्नराश्च सुखेन वसन्ति।

नटी —

इयं देवभूमिः प्रतीयते खलु।

सूत्रधारः —

आम् भगवतो महादेवस्यातिप्रियभूमि इयम्। यतो हि तस्य विविधानि मन्दिराणि विराजन्तेऽत्र यथा तारकेश्वरः, क्रान्तीश्वरः, हरेश्वरः, ऋषीश्वरः, मृडेश्वरः, दीप्तेश्वरः, बालीश्वरश्च[4]। कुर्मावतार-समये विष्णोरंशभूतः कूर्मः अत्रैव वर्षत्रयं पादयोः स्थित्वा अस्याः माहात्म्यं वर्धयामास[5]।

1— अत्र मानसेश्वरं मन्दिरमस्ति। मानस-सरोवरस्य सीमा इतः एव प्रारभते।
स्कन्द—पुराणान्तार्गते मानसेश्वर माहात्ये पञ्चषष्टितमेऽध्याये।

2— अत्रैव अर्जुनस्य बाणसन्धानेन मानस-सरोवरस्य जलं समायातः। अधुनापि अत्र वापिका वर्तते। अनेन जलेन मानसेश्वरसस्य अभिषेकः भवति।

3— गोरल-नामधेयः क्षेत्रदेवः।

4— अद्याप्यत्र बहूनि शिवमन्दिराणि सन्ति।

5— स्कान्दे मानसखण्डे कूर्माचलाख्याने विस्तरेण वर्णनमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नटी —

आर्यपुत्र ! नास्त्यत्र सन्देहावकाशः ।

सूत्रधारः —

आर्ये ! श्रुतं मया महाभारते भीमेनात्र स्वात्मजाय घटोत्कचाय चिरं निवासाय देवदारु — वनविभूषितं स्थानविशेषं प्रदत्तम् ।

नटी —

कथं कथम् आर्यपुत्र ! घटोत्कचस्तु कर्णस्य अमोघशक्त्या मृत्युं गतः ।

सूत्रधारः —

आम्, एवम् । एवं परं त्वं न जानासि । घटोत्कचस्य प्राणान्ते तस्यात्मानं कुत्रापि स्थानं न प्राप्तम् । अनेनैव

[३]

भारतान्ते तु भीमेन स्थानं तस्मै सर्मपितम् ।
अद्यापि वसते त्वत्र भीमपुत्रो महाबली ॥

आर्ये ! ममाक्षिभ्यामवलोकय—

[४]

देवदारुमयेऽरण्ये राजतेऽत्र घटोत्कचः ।
आगत्य दर्शनं कृत्वा सुखलाभं कुरु प्रिये ॥

नटी —

आर्यपुत्र ! अति सन्तुष्टास्मि ।

सूत्रधारः —

तर्हि कथं न्वस्माभिः कीर्तिवल्लभ–कविना विरचितम् अभिनवं रमणीयं नाटकमभिनेतुं यत्नो विधेयः । त्वं यथा शीघ्रं पात्रान् सुसज्जीकृत्य स्वस्वपाठेषु सावहिताः कुरु । अहमपि सभ्यान् सहृदयान् निवेदयामि यत्तऽपि दत्तावधानाः सन्तः घटोत्कचवनं दृष्ट्वा कविवरेण्यं कृतार्थयन्तु ।

❋ इति प्रस्तावना ❋

ततः प्रविशति अन्यमनस्को भीमसेनः । (भ्रमन्नात्मगतम्)

[५]

किं सत्यमस्तीति वयं प्रसन्नाः
जितेन राज्येन सुखेन किं वा ।
किं कौरवाणां निधनं न याति
चित्तेषु नित्यं खलु पाण्डवानाम् ॥

आह ! आशैशवादाप्तवैरिणः कौरवाः नः बान्धवा एवासन् । परम्—

[६]

ईर्ष्या–लोभेन द्रोहेण कुबुद्ध्या लुण्ठितेन च ।
कौरवाशशत्रुतां याता यया मृत्युमुखं गताः ॥

इति चिन्तयन् स एकस्यां नद्यास्तटे वटतरोः च्छायायाम् उपतिष्ठति । तत्रापि तस्य मानस–पटले क्रमेण जन्मतः अद्य पर्यन्तानि तानि सर्वाणि चित्राणि समायान्ति, यानि कौरवैः सह तेन व्यतीतानि । स्मारं–स्मारं स इत्थं ध्यानमग्नो दृश्यते यत्तस्येहलोकस्य स्मृतिः न भवति । अस्यामेवावस्थायां सः स्वाग्रभागे समागच्छन्तीं रूपमतीं रमणीं विलोक्य विचारयति—

[७]

अत्रैवागच्छन्ती विविधहासविलासमयी सा ।
किमियमस्ति पांचाली कान्यापरा भवितुं शक्यतेऽत्र ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अये !

[८]

चित्तं हरति मे सत्यं मनोज्ञा सा विलक्षणा ।
श्रीर्नवार्जितराज्यस्य निश्चयेनाति भाति मे ॥

विस्फारित—नयनाभ्यां विलोकयन् 'यदि नास्तीयं द्रौपदी तर्हि कथं हसति मे वदनम् ?'

[९]

किं कारणेनात्र मदीय भावः
तां वीक्ष्य रम्यां प्रति संविधत्ते ।
रतिः प्रसूता हृदये नवीना
न यौवनं मे न च कामतापः ॥

आह ! इयमस्ति मम प्रिया हिडिम्बा, निर्निमेषेण अवलोकयन् सः साश्रुनयनो भूत्वा प्रेमातिशयेन तां प्रति न किमपि वक्तुं शशाक ।

[१०]

तां वीक्ष्य कम्पित–तनुः वदनेन दीनः
रागान्वितः विविधभावविभावपूर्णः ।
साश्चर्यभीतिशुभदृष्टि—समादरेण
भीमो बभूव जडवद् हि बलेन हीनः ॥

तेनानुभूतं प्रणम्य हिडिम्बा किमपि कथयति ।

हिडिम्बा —

आर्यपुत्र ! भवद्भिः नान्यः शङ्काभिधेया । धर्मक्षेत्रे भवतां विजयवृत्तं श्रुत्वा

[११]

'अहं हर्षातिरेकेण भवतां दर्शनेच्छया ।
स्वकीया शंसनं नीत्वा आगतात्र हि केवलम् ॥'

नाथ ! स्मराम्यहमद्यापि तद्दिवस–विशेषं, यदा भवतां समेषां पाण्डवानां वधार्थं हिडम्बकेन तस्मिन्निविडेऽरण्ये सम्प्रेषिता । सौभाग्येन भवन्तं विलोक्य मम मतिः परिणता, चिन्तयामि भवतां दर्शनमात्रेण ममासुरीयाः भावाः गताः किल । झटिति तत्र मया विचारितः, नन्वयं श्यामाङ्गः तेजोनिधिः पुरुषविशिष्टो वलवान् मदर्थे पत्युः योग्यो भवितुं शक्यते । अतएव—

[१२]

अस्य मांसेन या तृप्तिः साचिरा स्वाददायिनी ।
पतित्वेन सदा योगः सुखभोगे भविष्यति ॥

तनैव विचारेण

[१३]

विलोक्य सौन्दर्यमयं शरीरं
तेजस्वितां दिव्य–प्रभाविशेषाम् ।
मया सहर्षं हृदयेन नूनं
त्वङ्गीकृतो नाथ ! पतिस्त्वमेव ॥

अपि च —

भ्रातृ-स्नेहेऽस्ति या प्रीतिः अल्पा सा दृश्यते भुवि ।
पति- स्नेहस्तु पूर्वाणां जन्मानां सञ्चितं धनम् ॥

इति विचार्य मया भ्रातुराज्ञा तिरस्कृता । आर्यपुत्र ! अद्याप्यहं तान् सुदिवसान् संस्मृत्य सुखमनुभवामि ।

[१४]

आयान्ति नित्यं मृदु-मानसे मे
दिनानि सर्वाणि मनोहराणि ।
शृङ्गार-क्रीडासु रतानि तानि
खल्वावयोः केलि—कलायुतानि ॥

किमन्यत्—

[१५]

आयाति नित्यं हृदये मदीये
आलिङ्गनं स्नेहमयं त्वदीयम् ।
नखक्षतं भूरि रतिः प्रसङ्गः
क्रीडाविलासे मदनस्य रूपम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आर्यपुत्र ! मातुः कुन्तीदेव्यास्सहितं युधिष्ठिरस्य चाज्ञया यदा आवयोः सम्मेलनं विवाहश्चाभवत् तदाऽऽवयोः स्थितिः कियादानन्दकारिणी आसीत् । स्वमाययाहं भवन्तमाकाशमार्गेण धरायाः कस्मिन् प्रदेशे न नीता ? प्रायः सर्वे उन्नतोन्नताः पर्वताः गह्वरादयः, शोभनानि नगराणि, नद—नदीनाम् उद्गम—स्थलानि विश्वस्य सर्वे सौन्दर्ययुताः स्थलविशेषाः आवाभ्यां भ्रमिता विहरिताः च ।

नाथ ! इदानीमपि तदानीन्तनाः रहस्यावयोः रसप्लाविताः शृङ्गारमण्डिताः वार्तालापाः भवतां कराङ्गुलीभिः ममाङ्गेषु जायमानः स्नेह युक्तो मधुरस्पर्शः मां स्पन्दयति रोमाञ्चयति च । किमधिकम्–

[१६]

एकान्तवासो स्वजनस्य योगः
सचुम्बनं स्वादुमयी च वार्ता ।
प्रियाङ्गुलीनां सुखदं मनोहरं
स्पर्शं न कस्मै रुचिरं करोति ॥

आर्यपुत्र ! यद्यपि भवतां समयानुसारेण एक एव वर्षाभ्यन्तरे मया भवतां संसर्गे किं किं न शिक्षितं तथापि मनस्तु मनः एव —

[१७]

जानामि नाथ भवतां हृदयं विशालं
भावाः च सन्ति नितरां मयि सानुकूलाः ।
जाने न तर्हि भगवन्नतिभीतभीता
सत्यं भवामि मनसा खलुभिन्नरूपा ॥

रोमाञ्चितो भीमः सहसाऽऽसनादुत्थाय

भीमः—

(चतुर्दिकं विलोक्य)

अये ! अत्र तु सर्वथा शून्यमस्ति । ईदृशं कथं भवितुं शक्यते ? इतः पूर्वं मया आभ्यां नयनाभ्यां स्वाभिमुखे आगम्यमाना हिडिम्बैव दृष्टा । तया मां प्रणम्य स्व-हृदि स्थिताः भावा एव न प्रकटिताः अपितु अस्माकं विजयमभिलक्ष्य स्वकीयाः शुभकामना-श्चार्पिताः । आश्चर्यं महदाश्चर्यं मामुपेत्य सा क्व गता ? (उच्चैः स्वरेणव) हिडिम्बे मां परित्यज्य त्वं क्व गता ?

(अप्राप्तप्रत्युत्तरं सः मनसि विचारयति) सम्भवतः सा मामुपहासं वा करोति । (स्नेहव्याजेन क्रीडारता वा वर्त्तते पौनः पुन्येन उच्चैः कथयति) हे हिडिम्बे ! क्व गताऽसि । ममान्तिके आविर्भव । अहं त्वां द्रष्टुमभिलषामि ।

[१८]

कथं मुञ्चसि मां शुभ्रे हिडिम्बे हे शुभानने ।
मायाविनि महाभद्रे ! सम्मुखे सुस्थिरा भव ॥

(इति ब्रुवन् स इतस्ततः धावति वारं वारं स एव ध्वनिः श्रूयते ।)

'कथं मुञ्चसि मां शुभ्रे हिडिम्बे हे शुभानने ।
मायाविनि महाभद्रे सम्मुखे सुस्थिरा भव ॥

(पटाक्षेपः भवति)

इति प्रथमोऽङ्कः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्यायमीराकयुद्धम्

—श्री प्रो० हरिश्चन्द्रः रेणापुरकरः
मामडी निवासः, 'गवर्नमेन्ट पालीटेक्नीक' इत्यस्य समक्षे
ऐवानशाही विभागः, गुलबर्गा–५८५१०२ (कर्नाटकप्रदेशः)

मन्दाक्रान्ता-वृत्तम्

(१)

श्वाक्रोशं जनमतरयं राष्ट्रसङ्घानुशास्ति
त्राणां च प्रणयभरितां प्रार्थनां तां निरस्य ।
म्रीकाया अधिपति—बुशैर्नूनमीराक — देशे
ग्रामं तं दमयितुमिवाकारि घोराक्रमो वै ॥

(२)

ग्रामो धारयति च महा-घोर-संहारकास्त्रा—
त्थं हास्योपरि च विनयं नूनमारोप्य दोषम् ।
त्राभावं भुवन—सदसोऽन्वेषकैर्घोषितेऽपि
रापातो विहित इह तैर्मार्च-विंशे दिनाङ्के ॥

(३)

त्रापूर्तिं सकलविषयेभ्योऽत्र नूनं विधाय
वर्ष यो जनयतितरां विश्वदेशेषु नित्यम् ।
वाद्य प्रबल—विकरालास्त्र—निर्माण—हेतो-—
ान्तोऽभूत् कपट—मिषतो नूनमीराक- देशः ॥

(४)

के तज्जनहित—विरोध्येकतन्त्रीय—शास्ति
मस्य क्षपयितुमयं केवलं ह्याक्रमोऽस्ति ।
म्रीका प्रकट-कथनं दम्भ एवास्ति नूनं
सत्तां परिणमयितुं साधिकारा हि लोकाः ॥

(५)

कीय—प्रचुर—विपुलांस्तैल—कूपान् विधातु—
ायत्तान् भवति नियतं ह्यम्रिका - कूटनीतिः ।
ह्येतद् भवति सुतरां स्वार्थहेतोः प्रवृत्तं
राष्ट्रैः प्रकट—विकटस्तस्य कार्यो विरोधः ॥

(६)

यद्यम्रीका निज—मन—विरोधासहिष्णुर्भवेच् चेत्
तत्सङ्घर्षः सकल—विषयैर्नूनमेवानिवार्यः ।
अम्रीका श्वो भरत—विषयं चापि लक्ष्यं विदध्यात्
शान्तिर्लोके मृग—जल-निभा स्वप्नमात्रं भवेद् वै ॥

(७)

सद्दामोऽसौ भवति नितरां लोक—पीडाकरश्चे—
दीराकीय—प्रबलजनता—दण्डनायास्य शक्ता ।
अम्रीका को भवति भुवने तस्य निष्कासनाय
त्याज्यैषा सा परम-कुटिला घोर-साम्राज्य-नीतिः ॥

(८)

अस्तं यानात् प्रवलतम—रूसीयसाम्राज्यभानो—
र्लोकेऽम्रीकाऽप्रतिहतगतिः शक्तिरेकाऽद्वितीया ।
नूनं वाञ्छत्यखिल—भुवनं स्वाधिकारे विधातुं
साम्राज्यं च त्रिभुवनगतं विस्तृतं कर्तुकामा ॥

(९)

सद्दामश्चेत् भवति नियतं केवलं युद्ध-लक्ष्यं
निष्पापाः किं शतश इह तैर्मारिताः स्फोटकास्त्रैः ।
येषां श्रुत्वा करुण-रुदितं क्रन्दनं घोरशोकं
सर्वेषां वै हृदय—कुहरा दीर्णशीर्णा भवन्ति ॥

(१०)

बग्दादादि— प्रमुख— नगरेष्वग्निसंतर्षकास्त्रैः
विध्वस्तानि प्रचुर—गृह—हर्म्याणि सौधानि सद्यः ।
एकं सद्दाममिह नियतं शासितुं चाम्रिकाङ्ग्लै—
र्निष्पापोऽसौ सकल—विषयो दण्डितः स्वार्थ-हेतोः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११)

सद्दामोऽस्ति प्रखर—बलवन् नूनमातङ्कवादी
तस्योच्छेदो भुवन—सुख—शान्त्यर्थमावश्यकश्चेत् ।
पाकाध्यक्षो भवति भुवने भीषणातङ्कवादी
ह्यु च्छेद्योऽपि प्रथममिह किं पोष्यतेऽम्रीकयाऽद्य ॥

(१२)

पाकाध्यक्षैः कशमिर-भुवि प्रेष्य नित्योग्रघोरान्
शस्त्रैः सज्जान् कुटिलकितवान् मारितास्तैरसङ्ख्याः ।
तेभ्योऽम्रीका वितरतितरां घोर-शस्त्रास्त्र-साह्यं
लोके प्रख्यापयति च निजं ह्युग्रवादारिमुख्यम् ॥

(१३)

अम्रीकायाः प्रबल— जनतन्त्रीय—शास्ति- प्रणाल्या
लोके संरक्षक इति महाख्यातिरप्यद्य नष्टा ।
पाके किं भो भवति जनतन्त्रीय—शास्तेः कणोऽपि
तर्ह्यम्रीका किमिह सततं तस्य पक्षावलम्बी ॥

(१४)

त्रैलोक्ये यो भवति नियतं ह्युग्र—वादस्य केन्द्रं
कश्मीरे यो भरतविषये प्रेष्य घोरोग्र—जाल्मान् ।
अर्धं लक्षाधिकशुचि—जनान् निष्ठुरं योऽमारयत्
पक्ष्यस्तस्य प्रभवतितरामम्रीकाऽप्युग्रवादी ॥

(१५)

अम्रीकायाः प्रबलतम—साम्राज्य—सत्ताधिकारं
स्वीकर्तुं यैर्नहि सहमतं सत्वरं तद्विरुद्धम् ।
अम्रीकायाः ब्रिटन-सहितं राष्ट्र-सङ्घं निरस्य
युद्धोद्घोषो भवति नियतं घोर-साम्राज्य-वादः ॥

शार्दूलविक्रीडित—वृत्तम्

(१६)

सद्दामेन दशाब्दपूर्वमभवद् घोरं ह्यवस्कन्दितो
ह्यन्यायेन कुवेटनामविषयस्तस्माच्च तस्योपरि ।
अम्रीकाऽऽक्रमणं समर्थितं समभवत् संयुक्तराष्ट्रैरपि
किन्त्वेतद् वितथापदेशविहितं सर्वैर्भृशं निन्दितम् ॥

मन्दाक्रान्ता—वृत्तम्

(१७)

सद्दामात्याचरण—कुपिता नूनमीराक—लोन्
अम्रीकाङ्ग्ल—प्रबल—पृतना-स्वागतं व्याहरेयुः
इत्याशा ब्लेयर—बुश—महाभागयोर्निष्फलाऽ
दीराकीयैरपि जनगणैर्युध्यते घोरमुग्रम्

(१८)

सप्ताहाभ्यन्तर इह भवेद् युद्धमेतत् समाप्
मित्यम्रीकाऽनुमितिरपि सा पूर्णमिथ्या बभूवे
सङ्ग्रामोऽसौ प्रचलतितरामद्य विंशे दिने
यीराकस्य प्रतिकृतिपरस्यापि तद्भीषणस्य

(१९)

बग्दादस्य प्रबल—पतनं नूनमन्ते ब
ह्यम्रीकाङ्ग्ल—प्रबल—पृतनाऽद्यैकविंशे दिनाङ्के
ईराकीय— प्रतिकृतिममूं सम्मुखीकृत्य
बग्दादे प्राविशदतितरां घोर—युद्धं विधाय

शार्दूलविक्रीडित—वृत्तम्

(२०)

सद्दामस्य विशालमूर्तिरपि सा बग्दाद—मध्य-सि
ह्युद्ध्वस्ता खलु तस्य घोररिपुभिः साकं प्रतिद्वंद्वि
आनन्दश्च विरोधिनागरजनैराविष्कृतः स
घोराराजकमेव तत्र नियतं लुण्ठाक-राज्यं खलु

(२१)

यं धर्तुं निहन्तुमेव विहितो घोरो महास
सद्दामो न धृतोऽस्ति नैव निहतः कुत्रापि गुप्तोऽभ
स्थाने तस्य सहस्रशोऽनघजना निष्कारणं मा
पृष्टव्याश्च तदर्थविश्वसदसा ह्याङ्ग्लाम्रिकाशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दाक्रान्ता—वृत्तम्

(२२)

-शान्त्यर्थं वै सकल—जगतः स्थापितं राष्ट्रसङ्घ—
युः श्रीकाङ्ग्ल—प्रमुख—विषयैः स्वैरवृत्त्या निरस्य।
राके यद् विहितमभवत् क्रूरघोराक्रमं तत्
स्यैवास्ति प्रलय—पिशुना मृत्यु—घण्टैव नूनम् ॥

(२३)

नं रासायनिक—विकरालास्त्रसंधारणार्थ—
ाक्रान्तस्तैः प्रकट—विकटं नूनमीराक—देशः।
ान्विष्यापि प्रहरण—गणो नैव लब्धोऽस्ति तत्र
षामित्थं विकट—कपटं नूनमाविर्बभूव ॥

(२४)

उद्ध्वस्तानामपि च विषये मस्जिदानां कृतेऽपि
जेहादाख्यं प्रखर—समरं मुस्लिमैर्घोषयद्भिः ।
पूर्णं ध्वस्ते ह्यपि च विषये मुस्लिमानां किमद्य
मौनीभूतैः सकल–विषयैः स्थीयते मुस्लिमानाम् ॥

(२५)

सद्दामोऽपि स्वजनविकरालास्त्रसार्धं गतोऽस्ति
सीरीयां वा इति स विषयो भीषणं तर्जितोऽस्ति।
तेभ्यो नूनं नहि वितरितुं चाक्षयं साह्यमेव
ह्यग्रे लक्ष्यं भवति नियतं सीरियैवाम्रिकायाः ॥

(२५)

मत्स्यन्यायानुसरणमभून् नूनमीराक—युद्धे
देशानां सङ्गतिरपि भवेत् पूर्ण–भिन्नैव लोके ।
व्यस्तः स्यात् सामरिकपरिवेषोऽपि विश्वस्य नूनं
यूरो—मुद्रा ह्यपि च भविता डालराच्छक्तियुक्ता ॥

ईशस्तवः

—डॉ० बलवीरदत्तशास्त्री
चिकित्सालयाध्यक्षः गौड ब्राह्मण
आयुर्वेद महाविद्यालयः ब्राह्मण
वास, रोहतक (हरियाणा)

(१)

ये ते नमामि प्रभो ! पादपद्मं
त्वया सृष्टमेतत् समस्तं हि विश्वम्।
विधत्से त्वमेवास्य सम्पोषणञ्च
विरामे त्वमेवास्य कुरुषे विलोपम् ॥

(२)

यं तिग्मरश्मिर्द्युमणिः प्रणीतः
शशी शीतदोऽकारि नक्तं त्वयैव ।
जलं जीवनं जीवमात्रस्य हेतु–
स्त्वया मारुतः क्लृप्त आश्वासकारी ॥

(३)

ऽभ्यधायि त्वयेयं धरित्री महेश !
कथं ते गुणान् ख्यातुमर्हामि तात ! ।
गुणानेव गायन्ति वेदास्त्वदीयान्
अहो देव—देवेश वन्द्यस्त्वमेव ॥

(४)

इयं संसृतिस्ते विचित्रा प्रसूतिः
समे प्राणिनो यत्र प्राणन्ति नित्यम् ।
स्वप्राक् पाप-पुण्याप्त-फल-प्रपञ्चैः
सुखं दुःखमत्राऽऽददतो नु जीवाः ॥

(५)

त्वमेवान्न—धान्यानि बुभुक्षितेभ्यः
धरण्या समुपाद्य प्रयच्छसीति।
यदा मेघ-धारा न पतन्ति पृथ्व्यां
तदा क्षुन्मृतप्राणि—हेतुस्त्वमेव ॥

(६)

अहं मन्दधीस्ते स्तुतिं नैव जाने
न पारं गुणानां क्वचित् कोऽपि वेत्ति।
अनेकाभिधानैः समे धर्मविज्ञाः
सदा कामयन्तेऽमृतं त्वां स्मरन्तम् ॥

(७)

अतो रक्ष विष्णो सदा पाहि भक्तान्
त्वमेवेन्द्र ब्रह्मन् ! महेशो गणेशः ।
अहं स्तौमि वन्दे जगद्रक्षकं त्वां
नमामीश ! मां पाहि मायाब्धिमग्नम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जलप्रदूषणं निरोधोपायाश्च

—डॉ० निरञ्जनमिश्रः

जीवनस्याधारभूततत्त्वेषु अन्यतमम् इदं जलं वायोः अनन्तरं महत्तमम् अस्ति इति सुनिश्चितम् । अस्मिन् वैज्ञानिके युगे भौतिक-विलासप्रभावात् प्राकृतिकतत्त्वानां क्षरणं भवति अहर्निशम् अस्मिन् विषये नास्ति मतवैभिन्नम् । प्राचीनकाले प्रकृतिं पूजयन्तो जनाः पर्यावरण-दोषविमुक्ता आसन्निति सत्यम् । सम्प्रति जलप्रदूषणेन सर्वत्र दूषणम् एव जायते, येन जीवनसत्तायाम् एव प्रश्नचिह्नम् आपतेद् आगामिनिकाले इति स्वीकुर्वन्ति तज्ज्ञाः । जलप्रदूषणकारणं निरोधोपायञ्च सामान्यतया चिन्तयामि अत्र अनपेक्षिततत्त्वविवेचनम् अपहाय ।

वयं जानीमः यत् जलम् एव आद्या सृष्टिः विधातुः । यथा **'या सृष्टिः स्रष्टुराद्या' 'अप एव ससर्जादौ'** इत्यादिवाक्यानि । प्राचीनकाले जलस्य सेवां कथं कुर्वन्ति स्म जनाः विषयस्यास्य परिचयः अवाप्यते नदीनां कृते मातृशब्द-प्रयोगेण । नदीनां तटे सभ्यतायाः विकासः नगराणां निर्माणं विकासश्च, इत्यादिभिर्विषयैः जलस्य महत्त्वं स्वीकुर्वन्ति वैज्ञानिकाः ऐतिहासिकाः वा ।

साम्प्रतं जलप्रदूषणस्य भयावहताम् अङ्गीकुर्वन्ति विशेषज्ञाः प्रदूषणावरोधार्थं योजना कल्पिता भवति, परञ्च परिणतिं न याति । किं योजनया कार्यसिद्धिः भवितुम् अर्हति ? प्रश्नस्य अस्योत्तरे वदन्ति नीतिकुशलाः ' न हि सुप्तस्य **सिंहस्य प्रविशन्ति मुखे मृगाः** '। दौर्भाग्य—मेतदस्माकं यत् विषवृक्षोच्छेदाय कृतसङ्कल्पाः वयं पलाशोच्छेदने संलग्नाः । यावदग्रिमपलाशो-च्छेदनाय गच्छामः तावत् पूर्वोच्छिन्नपलाशस्य स्थितिः पूर्ववत् भवति । क्रिया इयम् अस्माकं हस्तिस्नानवदेव । योजनावैशद्यम् अपहाय मूलतत्त्वम् उपस्थापयामि ।

जलप्रदूषण–कारणानि

विधातुः सृष्टिः तमाखुस्तमाखुस्तमाखुः इति-सिद्धान्तम् आधृत्य प्रवर्तते । यत्र रोगप्रसार-हेतुस्तत्रैव शमनोपायास्सन्तीत्युयार्वेदसिद्धान्तः सरणिमिमामेव पुष्णाति । संस्कृतकाव्येषु नदीनां स्वच्छवापीनां मत्स्यमकरादीनां वर्णनं वैशद्येन अवाप्यते । तत्र न केवलं वर्णनविलासः अपितु सन्देशः अपि अस्ति । नदीनां वापीनां मत्स्य—मकरादीनां रक्षणम् आवश्यकम् । अस्माकं जीवनरक्षणे सर्वेषाम् उपयोगिता अस्ति । जलगतजीवाः (जलचराः) जलगतं मलं भक्षयित्वा जीवन्ति । जलस्य स्वच्छता स्वयमेव भवति ।

भगवता जलप्रदूषण–निवारणार्थमेते कल्पिता। इति मन्ये । भौतिकयुगेऽस्मिन् स्वार्थवशीभूतैः धनोपार्जनम् एव जीवनमूल्यं मन्यमानैः, तमो-गुणमज्जितैः वा मत्स्यमकरादीनां विनाशः कृतः । इमे जीवाः तैः एव कृतं जलप्रदूषणम् समापयितुं प्रयासं कुर्वन्ति । देवीरूपेण कल्पितानां नदीनां वाहनं मकरः । मृते वाहने सा देवी कथं यात्रां करिष्यति ? शैलात् सागरगामिनीयं सरित्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विविधमागण तत्रत्यलोकानां जीवनरक्षणं करोति। यात्राभावे नद्या रक्षितानां रक्षणमपि नष्टमेव। विधिकल्पित: जलप्रदूषणशमनोपाया: विचिन्तयतां प्रयास: श्लाघ्योऽश्लाघ्यो वेति तर्कयन्तु तर्कशीला: । मन्मते तु रोगप्रतिरोधकशक्ति विनाश्य शारीरिक्यनैरुज्यम् इच्छतां वैद्यानां मनोरञ्जकलास्यम् एव इदम् ।

पूर्वं नदीनां प्रखरप्रवाहो भवति स्म, येन सर्वं मलं सागरं गच्छति स्म, परञ्च वैज्ञानिक– बुद्धिविलासात् प्रवाहस्य अभाव: अभवत् जलाभावात्। अत: धारा अपि मलापसारणे अक्षमा अभवत्। यस्यां धारायां पोताध्यक्षोऽपि प्रखरप्रवाहप्रभावात् पोतनियन्त्रणे अक्षम: भवति स्म, तस्यामेव धारायां सम्प्रति लघुनौका अपि जलाभावात् बाधाम् अनुभवति यथा बिहाररराज्ये गङ्गा नदी । भौतिकविकासप्रभावात् यथा यथा जलप्रवाहाभावो भवति तथा तथा मलोत्सर्जने वृद्धि: औषधीनाञ्च नाश:। न सन्ति धारासु मलभक्षका: जीवा: न च मलापसारणक्षमप्रवाह: । अस्यां परिस्थितौ जलप्रदूषणं न भविष्यति, तदा किं भविष्यति ?

न केवलं धारासु जलप्रदूषणम् अस्ति अपितु भूगर्भस्थितजलेऽपि प्रदूषणम् अस्ति । भूगर्भे जलस्तरस्य न्यूनता वर्धते प्रतिदिनम् इति स्वीकुर्वन्ति तज्ज्ञा:। भूगर्भात् जलनिष्कासने वृद्धि: भवति जनसंख्यावृद्धिवदेव, परञ्च जलकोशस्य वृद्धिमार्गावरोधनम् अभवत् । सञ्चितकोषस्य क्रमश: व्ययात् समाप्ति: तु भविष्यति एव। तदनन्तरं जलाभावे भूमि: इयं सिकतामयी भविष्यति, इति निश्चप्रचम्।

विषयान् इमान् आलोच्य यदि वयं तदवरोधने सज्जा: नाभविष्याम तदाऽऽगामिनि काले अस्माकं जीवने दैव एव प्रमाणमिति नातिशयोक्ति: ।

समाधानम्

जलाप्रदूषणावरोधनाय मार्गत्रयं कल्पयामि । यथा—

१– जलजीवानां रक्षणं तेषां वृद्धिश्च ।
२– धारासु औद्योगिकमलोत्सर्जनावरोधनम् ।
३– धाराणां मार्गशोधनम् ।

१- जलजीवानां रक्षणं तेषां वृद्धि: च-

मत्स्यकच्छपग्राहादिजलचरा: जलगतमलानां, मृतपशूनां शरीराणि, मानवशरीराणि भक्षयित्वा मलापहरणं कुर्वन्ति, स्वगत्या शल्यक्षेपणादिभिश्च नैरन्तर्येण जलशोधनं कुर्वन्ति । एतेषां जीवानाम् अभावे मृतशरीराणि जले एव गलितावस्थायां स्थित्वा जलं दूषयन्ति । यदि एतेषां सम्बर्द्धनं रक्षणञ्च भवेत्तदा नूनमेव जलप्रदूषणावरोधनं भवितुम् अर्हति ।

२-औद्योगिकमलोत्सर्जनावरोधनम्–

औद्योगिकमलोत्सर्जनेन धारायां प्रदूषणं भवति आधिक्येन। यद्यपि यानप्रक्षालनेन वा स्थाली—प्रक्षालनेनापि भवति दूषणं परञ्च औद्योगिकमलोत्सर्जनस्य तुलनायां दूषणमिदं जलधौ बिन्दुनिपातनवदेव भवति । प्राय: नगराणां मलोत्सर्जननालिका: अपि धारायामेव पतन्ति । मार्गेणानेनापि वर्द्धते प्रदूषणम् । यदि एतेषाम् अवरोधने वयं प्रयासरता:, न केवलं वाचा अपितु कर्मणा भवेम तदा नूनमेव प्रदूषणावरोधनं भविष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३- धाराशोधनम्-

प्रायः नदीनां धारा सिकतावार्धक्यात्, मलबाहुल्यात्, जलनियन्त्रणात् वा अवरुद्धा भवति। दशा इयम् आनुकूल्यम् अपहाय प्रातिकूल्यं पुष्णाति। या धारा जीवनसम्पोषिका भवति, सैव जीवननाशिनी इव भवति। उदाहरणार्थं यमुनायाः धारा मलैः अनरुद्धा, गङ्गायाः धारा जलनियन्त्रणात् दीनत्वं गता, कमलायाः धारा सिकताधिक्याद् अवरुद्धा। कमलायाः दशा दर्शनीया अस्ति बिहारे। तस्याः धारा सिकतामयी दृश्यते। जानुदघ्नमपि जलं महत् प्लवनम् इव प्रतीयते। यदि सम्मिलित-प्रयासैः समाधानं स्याद् अस्याः समस्यायाः तदा प्रदूषणावरोधने वयं समर्थाः भविष्यामः इति कल्पयामः।

भूगर्भस्थितजलविषये चिन्तनम् अपि अत्यावश्यकम्। सामान्यविचारस्य विषयोऽयं यत् वर्षा-जलैः आर्द्रा भवति भूमिः। क्रमेण तदेव जलं भूमिगर्भे सञ्चितं भवति यत् नलकूपद्वारा बहिः आयाति। तस्य जलस्य वृद्ध्यर्थं न केवलं वृष्टेः अपेक्षा अपितु सिक्ता भवेत् धरणी तेनान्तः यावत् गच्छेत् जलम् इत्यपेक्ष्यते। वैज्ञानिक—युगेऽस्मिन् भौतिकसुखलाभाय सर्वत्र भाति पक्कीकरणं (प्लास्टरमिति। येन भूमिमार्गेण जलमन्तः गच्छति एव नहि, अपितु वर्षाजलं नालामार्गेण धारायां तेन च सागरं गच्छति। अनेन क्रमशः भूगर्भजलकोशक्षयो भवति। अतः भौतिकसुखम् अनपेक्ष्य भूगर्भ–गतजलकोशरक्षार्थं प्रयासो विधेयः।

इत्थं सर्वं ज्ञात्वा अपि वयं केवलं चिन्तयामः, न तु कार्ये नियोजयामः। अस्माकं योजना सञ्चिकायाम् एव फलति, न तु धरणौ। अतः यदि वयं प्रदूषणमुक्तिं वाञ्छामः तदा न केवलं जल्पनस्य अपितु कार्यस्य आवश्यकता अस्ति। विषयम् अमुं विचिन्त्य कार्ये नियोज्य वयं जलप्रदूषणात् मुक्ताः भवितुं शक्नुमः।

गलज्जलिका

नूनं तदेव सूते !!

मिश्रोऽभिराजराजेन्द्रः,
कुलपतिः वाराणसीस्थसम्पूर्णानन्द
संस्कृतविश्वविद्यालयीयः

सृजति प्रभां प्रदीपो रात्रिस्तमो युनीते
यस्मिन् क्षमोऽस्ति यो वै नूनं तदेव सूते ॥१॥
सलिलं न दीयते किं प्रचुरं कपित्थमूले ?
कदलीं प्रयत्नलक्षैर्न तथाऽप्यसौ वृणीते ॥२॥
बन्धो ! कृतं वितण्डाछलजातिनिग्रहाद्यैः
त्रैकालिकं न सत्यं शशशृङ्गतां जिहीते ॥३॥
ऋविमृश्यकारिणो ये, पश्यन्ति ते निपातम्
कथमिति ? मृगेण पुष्टो लघुपतनकस्तृणीते ॥४॥
न भुवं स्पृशन्ति सम्प्रति सद्भावरविमयूखाः
दुर्वृत्तघनघटाभिर्नीलाम्बरे परीते ॥५॥
घटते विलक्षणं तत्सर्वं क्षणे विशिष्टे
मुक्ता क्व शक्तिगर्भे स्वात्यम्बुदे व्यतीते ॥६॥
परिवेष्टयन्ति निम्बं न कदाप्यहो भुजङ्गाः
नच मन्थनैर्जलानां नवनीतमभ्युदीते ॥७॥
वैभवविलासकीटा जीवन्ति व म्रियन्ते
लोके स्वकीर्तिसौधं कोऽप्येव निर्मिमीते ॥८॥
कवयति हि शारदेये कविवल्लभेऽभिराजे
अतथाकलः कवीनां पुच्छं गणो धुनीते ॥९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कविता-युगलम्

—डॉ० निरञ्जनमिश्रः, प्रवक्ता साहित्य विभागे
भगवानदास आदर्श-केन्द्रिय संस्कृतमहाविद्यालयः
पो०-गुरुकुल काँगडी-२४९४०४ (हरिद्वारम्)

क्रीडनेश्वरस्य मनोहरम्

(१)

लम्बदण्ड—वृत्त—पिण्ड—क्रीडनं मनोहरम् ।
धावनं परस्परञ्च दर्शनं मनोहरम् ॥

(२)

धावता जनेन पिण्डक्षेपणं मनोहरं
तस्य ताडनं विधाय धावनं मनोहरम् ।
येन केन तत्र पिण्ड-कर्षणं मनोहरं.
क्षेपणात् त्रिदण्डिकाविघट्टनं मनोहरम् ॥

(३)

सीम्नि घट्टनेन तत्र धावनं चतुष्टयं
याति मेघमार्गतस्तु धावनं त्रिक-द्वयम् ।
पिण्डमुत्पन्नमेव गृह्यते जनेन चेत्
क्रीडकस्य सन्मुखस्य दर्शनं मनोहरम् ॥

(४)

क्रीडकेन तत्र पिण्डप्रेषणं मनोहरं
यदा कदा पदेन पिण्ड-रोधनं मनोहरम् ।
मूर्तिवत् स्थितस्य निर्णायकस्य हस्तयोः
चालनं तथाऽङ्गुलेरुत्तोलनं मनोहरम् ॥

(५)

तत्र संस्थितैस्तु क्षेत्ररक्षणं मनोहरं
परस्परं सहोदरत्व-दर्शनं मनोहरम् ।
दिनेऽथवा निशामुखेऽस्तु क्रीडनं मनोहरं
क्रीडनेश्वरस्य पश्य दर्शनं मनोहरम् ॥

अमलं कमलम्

(१)

अमलं कमलं विकसति नित्यम्
सूर्यं दृष्ट्वा विहसति नित्यम् ।
यत् दृष्ट्वा मधुपो मधुलोभी
गुञ्जन् मधुरं नृत्यति नृत्यम् ॥

(२)

मधुरतरङ्गैर्नृत्यति नित्यम्,
सूर्यो यत् वा चुम्बति नित्यम् ।
मृदुले कोषे शयनं मत्वा
रात्रौ मधुपः शेते नित्यम् ॥

(३)

दले निशायां मिहिका-बिन्दुं
प्रकृतिः स्वयं पातयति नित्यम् ।
मत्वा चाश्रु—बिन्दुं सूर्यः
प्रातः तं मार्जयति नित्यम् ॥

(४)

शिव-पूजायां बुधजन-वन्द्यं
सिन्धु-सुतायाः सदनं रम्यम् ।
कर-पद—नयन-मुखानामुपमा-
दाने कवि-जन-वन्द्यं तत्त्वम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाविद्यालय—समाचाराः

—डॉ० व्रजेन्द्रकुमारसिंहदेवः

स्वामिदर्शनानन्द-संस्कृतयोगनाट्य-कलानुसन्धानसंस्थानस्य स्थापना

(ज्वालापुरम्)। ज्वालापुरस्थस्य गुरुकुल-महाविद्यालयस्य तत्त्वावधाने १७-७-२००३ तमे दिनाङ्के संस्कृतस्य प्रचाराय प्रसाराय समुत्थानाय च स्वामिदर्शनानन्द-संस्कृत-योग- नाट्यकला-नुसन्धान—संस्थानस्य स्थापनाऽभवत्।

गुरुकुलमहाविद्यालयज्वालापुरस्य प्राचार्याः डॉ० हरिगोपालशास्त्रिमहाभागाः संस्थानस्योद्घाटनं कृतवन्तः। अवसरेऽस्मिन् तैरुक्तं यद् यदि देशस्य सर्वे विद्यार्थिनो देववाणीं संस्कृतं व्यवहार-रूपे प्रयोगं करिष्यन्ति, तर्हि अस्याः संस्कृत-भाषायाः समुन्नतिः भविष्यति। यतो हि संस्कृतं संस्कारकारी भाषा वर्तते। संस्कृतस्यास्य प्रचार-प्रसारमाध्यमेन न केवलम् उत्तराञ्चल-प्रदेशस्यापितु राष्ट्रस्योन्नतिः भविष्यति।

संस्कृतभाषायाः महत्त्वं प्रतिपादयन्तः उपाचार्याः डॉ० केशवप्रसादोपाध्याय महाभागाः उक्तवन्तो यत् अस्य संस्थानस्य सङ्गठनेन छात्रेषु विद्वत्सु च निश्चितरूपे संस्कृतं प्रत्यनुरागं भविष्यति। कुलसचिवाः डॉ० अजयकौशिक—महाभागाः संस्कृतविषये एकां कथां कथितवन्तः। शुभावसरेऽस्मिन् तैरुक्तं यत् देववाणी एकैव भाषाऽस्ति, या भाषा सर्वासां भाषाणां जननी वर्तते।

स्वकीये वक्तव्ये संस्थानस्य सचिवाः डॉ० व्रजेन्द्रकुमारसिंहदेवमहाभागाः उक्तवन्तो यत् संस्थानस्य मूललक्ष्यं तु समग्रेऽपि राष्ट्रे संस्कृतस्योन्नतिजनितमस्ति। एषा संस्कृत-भाषा धर्म-अर्थ-काम-मोक्ष—दायिनी वर्तते।

व्याकरणप्राध्यापकेन श्री राकेशकुमार—शास्त्रिणा संस्थानस्योद्घाटन—समारोहस्य संयोजनकार्यं कृतम्। संयोजकाः श्री राकेश-कुमारशास्त्रिमहाभागाः संस्थानस्य पदाधिकारीणां गठनस्य घोषणां कृतवन्तः।

घोषणानुसारं डॉ० हरिगोपालशास्त्री (अध्यक्षः) डॉ० केशवप्रसादउपाध्यायः (उपाध्यक्षः) डॉ० व्रजेन्द्रकुमारसिंहदेवः (सचिवः), डॉ० मनोज-किशोरपन्तः (कोषाध्यक्षः) डॉ० सुरेशचन्द्रत्यागी (प्रचार-प्रसार-संयोजकः) श्री राकेशकुमार—शास्त्री, श्रीसुमनकुमार झा, श्रीसुशीलकुमारत्यागी च (प्रचार-प्रसार-सहसंयोजकाः) श्री मधुसूदन-निरौला (वर्गप्रशिक्षकः) च स्वामिदर्शनानन्द-संस्कृत-योग-नाट्य-कलानुसन्धान— संस्थानस्य पदाधिकारिणो भवन्ति।

अस्मिन् समारोहे स्वामिदर्शनानन्द-संस्कृत-योग— नाट्य— कलानुसन्धान—संस्थानमाध्यमेन देववाणी लोकवाणीरूपेण समग्रे राष्ट्रे बहुशीघ्र स्थापितं भविष्यतीति संस्थानस्याध्यक्षाः डॉ० हरिगोपालशास्त्रिमहाभागाः उक्तवन्तः।

अवसरेऽस्मिन् सांस्कृतिक—कार्यक्रम-स्यायोजनमपिसमभवत्। समारोहस्य मुख्यातिथय उत्तराञ्चलप्रदेश— सर्वकारस्य मुख्यमन्त्रिणः संयुक्तसचिवाः श्री विजयकुमारढौंढियाल—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाभागाः आसन् । तथा चातिथयो डॉ० वेदप्रकाशशास्त्री (आचार्यः उपकुलपतिश्च गुरुकुल काँगडी विश्वविद्यालस्य च) डॉ० महावीर अग्रवालः (कुलसचिवः गुरुकुल काँगडी विश्वविद्यालयस्य), सुश्री डॉ० सतीशकुमारी (प्राचार्या ऋषिसंस्कृतमहाविद्यालयस्य), डॉ० भोलानाथ झा (प्राचार्यः भगवानदास संस्कृतमहाविद्यालयस्य) प्रभृतयः चानेके विद्वान्सः समुपस्थितवन्तः।

विद्वत्कलापरिषदः निर्वाचनम्

ज्वालापुरीय—गुरुकुलमहाविद्यालयस्य बोधमन्दिर—सभाभवने संस्थायाः प्राचार्याणां डॉ० हरिगोपालशास्त्रिमहाभागानामध्यक्ष्यतायां एकादशकक्षातः आचार्यकाक्षापर्यन्तं अध्ययन-निरतानां विद्यार्थिनां कृते विद्वत्कला—परिषदः निर्वाचनं सर्वसम्मत्या सम्पन्नम् ।

अवसरेऽस्मिन् विद्वत्कलापरिषदोऽध्यक्ष्यमहाभागैरुक्तं-यत् अस्याः परिषदः निर्वाचनस्योद्देश्यं तु छात्राणां शारीरिक–बौद्धिक--विकासमूलकं वर्तते । यथैव प्रकाशवीरशास्त्री, श्री शिवकुमारशास्त्री प्रभृतयो विद्वांसः विद्वत्कलापरिषद्माध्यमेन न केवलं भारतवर्षे अपितु विदेशेष्वपि सुख्यातिमवाप्नुवन्, तथैव भवन्तोऽपि सुख्यातिं प्राप्तुं समर्थाः भविष्यन्ति ।

अवसरेऽस्मिन् विद्वत्कला- परिषदः पदाधिकारिणः निम्नरूपेण निर्वाचिताः। यथा—

अध्यक्षः — डा० हरिगोपालशास्त्री, प्राचार्यः
मन्त्री — ब्र० विजयगिरिः
उपमन्त्री — ब्र० प्रवीणभाटी
संयोजकः — ब्र० तरुणकुमारदीपः,
उपसंयोजकः — ब्र० गौरवत्यागी

आर्यकिशोरपरिषदः निर्वाचनम्

ज्वालापुरीय-गुरुकुलमहाविद्यालये षष्ठकक्षातः दशमकक्षापर्यन्तम् अध्ययनरतानां छात्राणां कृते आर्यकिशोर—परिषदः निर्वाचनमभवत् ।

अस्याः परिषदोऽध्यक्षाः संस्थायाः उपाचार्याः डॉ० केशवप्रसादशास्त्रि-महोदयाः सन्ति । अवसरेऽस्मिन् अध्यक्षाः डॉ० केशवप्रसादशास्त्रिणः तत्रस्थ—समुपस्थितं परिषत्मण्डलीं, छात्रान्, अतिथिगणान् स्वाध्यक्षीयवक्तव्ये उक्तवन्तो यत् अस्याः परिषदः निर्वाचनस्योद्देश्यं वर्तते यत् ब्रह्मचारिणो निर्भयेन स्वविचारान्, स्वकाय–विविधकलायाः प्रस्तुति-करणं, भाषणं, श्लोकोच्चारणप्रभृतीन् उपस्थापनं कर्त्तुं पारयिष्यन्ति ।

अवसरेऽस्मिन् संयोजकाः व्याकरण—प्राध्यापकाः श्री राकेशकुमारशास्त्रिमहोदयाः स्वविचारान् प्रस्तुतवन्तः। गुरुकुलमहाविद्यालयस्य सर्वे प्राध्यापकाः ब्रह्मचारिणोऽवसरेऽस्मिन् तत्र समुस्थितं भूत्वा करतालिकाभिः निर्वाचितान् पदाधिकारिणः स्वागतं कृतवन्तः। आर्यकिशोर-परिषदः पदाधिकारिणो निम्नवत् वर्त्तन्ते—

अध्यक्षः — डा० केशवप्रसाद शास्त्री (उपाचार्यः)
मन्त्री — ब्र० मयंक— कुमारः,
उपमन्त्री — ब्र० मनीष — सचदेवा ।
संयोजकः — ब्र० सञ्जय—गौतमः,
उपसंयोजकः — ब्र० भानुप्रतापशर्मा ।
क्रीडामन्त्री — ब्र० खगेन्द्र प्रसादोपाध्यायश्च:

शुभावसरेऽस्मिन् निर्वाचनाधिवेशनस्यान्तिमे समये संस्थायाः प्राचार्याः डा० हरिगोपालशास्त्रि-महाभागाः सर्वान् धन्यवाद-ज्ञापनं कृतवन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

BHARATODAYA
R N.I. Regd No. UPBIL/1998/1485 Postal Regd. No. UA/DN-73/2002

प्रथम पृष्ठस्य शेषांशः

वञ्चकोऽपि न पापिष्ठः

'यस्य पुरुषस्य तद् धनं स्यात् तस्मै प्रतिदेहि, अत्र अन्यत् किं विचारणीयम् ?' गुरुः प्राह। 'यदि तद् धनम् अहं भवते प्रतिददानि तदा ?' वञ्चकः स्मयमानः इव प्रोवाच। 'न हि, न हि, अहं तु तद् धनं कदापि न ग्रहीष्यामि।' गुरुः उभाभ्यां हस्ताभ्यां निषेधाभिनयं कुर्वाणः परिवर्जयन् इव प्रत्युवाच। 'अत्र इदं वर्तते...... गुरुमहोदय ! यस्य पुरुषस्य तद् धनं वर्तते: सः तत् स्वीकर्तुं नाभिलषति। अहं तु बहुवारं दातुम् ऐच्छं परन्तु सः ग्रहीतुमेव नेच्छति। एतस्यां परिस्थित्याम् अहं किं करवाणि ?' वञ्चकः प्राह। 'यदि एवम् अस्ति तर्हि तु त्वं तद् धनं स्वकीयपार्श्वे रक्षितुम् अर्हसि। अत्र किमपि पापं न वर्तते। तव एतत् पापं तु प्रभुः ईशः क्षाम्यति।' गुरुः तं वञ्चकं प्रत्यब्रवीत्। गुरोः वचनं श्रुत्वा स वञ्चकः मन्दिरात् निष्क्रान्तुम् आरभत। मन्दिरस्य द्वारदेशं च सम्प्राप्य सः गुरुम् उक्तवान् 'महाशय ! अहं पुनरपि भवन्तं कथयामि यत् तद् धनं कृपया गृह्णातु।'

'अहं कदापि तद् धनं न ग्रहीष्यामि। त्वं मया समं पुनरेवंविधां वार्तां न कुरुष्व।' गुरु-महोदयः क्षुब्धः कोपाविष्टः उवाच। 'अस्तु, यस्य तद् धनं वर्तते सः स्वयमेव यदि तत् ग्रहीतुं न कामयते, प्रत्युत परिवर्जयति, अतः अहमेव तद् धनं स्वकीयपार्श्वे सुरक्षामि। यतो हि भवदीयविचारे तु एतत् पापकृत्यं न भविष्यति।' इति कथयन् सः वञ्चकः सहसा मन्दिरात् अन्तर्हितः सञ्जातः।

हरिद्वारस्थितस्य ज्वालापुरीय–गुरुकुलमहाविद्यालयस्य मुखपत्रम्

भारतोदयः (संस्कृत–मासिकम्)

P. O. गुरुकुलमहाविद्यालयः २४९४०४

हरिद्वारम् (उत्तराञ्चलम्)

सेवायाम्,

श्री— ....

तस्य गमनानन्तरं यदा गुरोः हस्तः स्वकीय वस्त्रस्य कोषे गतः तदा सः विस्मयान्वितः सञ्जातः। कोषः तस्य रिक्तः आसीत्। धनस्यूतः नष्टः आसीत्। गुरुः तदा धावन् इव मन्दिरात् बहिः आगतः। सः यत्र तत्र तम् अन्वेष्टुं प्रयासं कृतवान् परन्तु सः वञ्चकः अन्तर्हितः एव बभूवः। अथ च तेन वञ्चकेन तु स्वकीयस्य पापस्य पूर्वतः एव गुरोः क्षमां कारयित्वा निष्पापत्वं सम्पादितम् आसीत्। गुरुः तस्य सम्पूर्णं वाग्जालं स्मरन् ततः परं पापक्षमाकर्मणि व्यर्थम् उत्साहं प्रकटयति स्म।

वस्तुतः कोऽपि कस्यापि पापं क्षमितुं न पारयते। अन्यथा लोके सर्वेऽपि निष्पापाः एव भवेयुः। उक्तं खलु–'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्।' चेति। ★

मुद्रकेण, प्रकाशकेन डॉ० हरिगोपालशास्त्रिणा ज्वालापुरीये 'अनुभव प्रिंटिंग प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीय–गुरुकुलमहाविद्यालयसभया।
सम्पादकः डॉ० हरिगोपालशास्त्री